संस्कृत-वार्ता:
31.07.2024
सायम् - 06:20

## मुख्यवार्ता:

- गृहमन्त्री अमितशाह: साम्रेडितवान् यत् वायनाडे भयंकर-भूस्खलन-जन्यविनाशात् जनानां रक्षणसहाय्यार्थं केन्द्रसर्वकार: केरलशासनाय सर्वविधसाहाय्यम् उपपादयिष्यति। तत्र मृतकानां संख्या पञ्चषष्ट्युत्तरैकशतं सम्प्राप्ता।
- प्रशासनेन प्रोदितम् यत् बुलेट्-ट्रेन इति अत्याधुनिक-गोलिकागतिकस्य रेलयानस्य परियोजना सजवं प्रवर्धते।
- त्र्यशीत्युत्तरैकोनविंशतितमवर्ष-वर्गस्य प्रशासनिकाधिकारि प्रीतिसूदनवर्या संघलोकसेवायोगस्य अध्यक्षा नियुक्तास्ति।
- हमास इत्यातंकिगुल्मस्य राजनीतिकप्रमुख: 'इस्माइल हानिया' ईरानस्य राजधान्यां निहत:।
- पेरिस ओलम्पिकमहाकुम्भे मुष्टामुष्टीक्रीडिका लवलीना-वॉर्गोहाइन् उपान्तचक्रं प्राविशत्। पीवीसिंधु:, लक्ष्यसेन: श्रीजा अंकुला च प्रागुपान्तचक्रं प्रविष्टवन्त:, लक्ष्यवेधक: स्वप्निल: कुशाले: पुरुषाणां पञ्चाशन्मीटरमितायां भुशुण्डिका लक्ष्यवेधनस्पर्धायाम् अन्त्यचक्रीय द्वन्द्वाय समर्हो जात:।

## वायनाड-भूस्खलनम्

केरले सुरक्षोद्धार-कर्मिभि: वायनाडस्य मुण्डक्कई मध्ये शवानां निष्कासनं समारब्धम् अस्ति। यत्र दुरापन्ने भीषण-भू-स्खलनस्य कारणेन बृहन्मात्रायां जन-धन-क्षति: जातास्ति। आमान्यते यत् मृत्तिकान्तरे, पाषाण-खण्डानामधस्ताच्च नैके शवा: निपीडिता: सन्ति। मलप्पुरम्-जनपदे चलियार-नद्या: नैके शवा: निष्काष्यमाणा: सन्ति। ध्येयम् अस्ति यत् भूस्खलने नैके शवा: नद्यां प्रवाहिता: आसन्। साम्प्रतं यावत् अस्यां दुर्घटनायां मृतकानां संख्या समेध्य वर्धतेतराम्। सूचनाप्राप्तिं यावत् पञ्च-षष्ट्यधिक-एक-शतं मिता: जना: मृत्युमुपगता: सन्ति। नैके पारेशतं व्रणिता: जना: विभिन्नेषु चिकित्सालयेषु उपचाराधीना: वर्तन्ते। एतदपि सूच्यते यत् अतोऽपि पारेशतं जना: विलुप्ता: वर्तन्ते। किन्तु एषा संख्या इतोऽपि वर्धितुं शक्नोति। वायनाड-भूस्खलनसन्दर्भे गृहमन्त्री अमितशाह: उक्तवान् यत् केरलराज्याय पूर्वमेव जुलाईमासस्य त्रयोविंश्यां-चतुर्विंश्यां-पञ्चविंश्याञ्च सुरक्षादृशा अतिवृष्टे: संचेतनाया: सूचना प्रदत्तासीत्। राज्यसभाया: ध्यानाकर्षणसत्रे श्रीअमितशाह: प्रोक्तवान् यत् एतदतिरिच्च अपि जुलाई-षड्विंश्याम् अतोऽपि एका अपरा सुरक्षा-संचेतना अतिवृष्टिमभिलक्ष्य राज्यशासनाय प्रदत्तासीत्। अमुना भणितं यत् आपदुद्धारबलमपि पूर्वमेव तत्र सम्प्रेषितमासीत् परं केरलशासनेन तस्य बलस्य यथोचितं नियोजनं ससमयं नैवाचरितम्। येन जनानामुद्धारकार्यमपि ससमयं नजातमिति। गृहमन्त्रिणा प्रोक्तं यत् यदि केरलशासनेन

यथाकालं निर्देशान् अनुपाल्य सर्वमेवम्  आचरितम् अभविष्यत् तदा मृतकानां संख्या इयति अधिका नैव वर्धिता स्यात्।

वैष्णव-बुलेट-ट्रेन

प्रशासनेन अद्योक्तं यत् बुलेटट्रेन इति गोलिकागत्यात्मक-रेलपरियोजना सजवं वर्धमानास्तीति। अद्य लोकसभायां प्रश्नकालावधौ पूरकप्रश्नस्योत्तरे रेलमन्त्रिणा अश्विनीवैष्णवेन प्रोक्तं यत् राष्ट्रे प्रथम-परियोजनात्वेन अन्त:सागरीय त्रिंशत् मीटरपरिमितस्य निम्नतरस्य एकविंशतिकिलोमीटरदूरतायुतस्य च रेलगुहामार्गस्य निर्माणकार्यं क्रियते। तेनोक्तं यत् परियोजनाया: विंशत्युत्तरत्रिशत-किलोमीटरपर्यन्तस्य मार्गस्य आधारात्मकं कार्यं सम्पन्नमिति।

प्रीति-सूदन

पूर्व केन्द्रीयस्वास्थ्यसचिवत्वेन नियुक्ता त्र्यशीत्यधिकैकोनविंशति-तमवर्ष-वर्गस्य प्रशासनिकाधिकारी प्रीतिसूदन: संघलोकसेवायोगस्य अध्यक्षा नियुक्तास्ति। राष्ट्रपतिना द्रौपदीमुर्मुवर्यया अस्या: नियुक्ते: स्वीकृति: सन्दत्ताऽस्ति। सा अगस्तमासस्य  प्रथमदिवसत: कार्यभारं ग्रहीष्यति। सुश्रीसूदन: डॉ: मनोजसोनी इत्यस्य स्थानं ग्रहीष्यति। येन अस्य मासस्य प्रारम्भे एव स्वकार्यकालपूर्ते: प्रागेव पदत्यागो विहित: आसीत्।

इस्माइल हानिया मृत्यु:

‘हमास’ इत्यातंकि-गुल्मस्य राजनीतिक-नेतु: इस्माइल-हानियाया: तेहरान-मध्ये हत्या जाता। ईरान-देशस्य ‘इस्लामिक रिवोल्यूशनरी गार्ड कॉर्प्स’ इत्याख्येन बलेन एकस्मिन् वक्तव्ये प्रतिपादितमस्ति यत् ‘हानिया’ तस्यैक: अंगरक्षकश्च ईरानस्य राजधान्यां तस्य आवासे एव पञ्चतां प्रापितौ। ‘हानिया’ ईरान-राष्ट्रपते: मसूद-पेजेशकियानस्य शपथग्रहण-समारोहे भागं भजितुम् आगत: आसीत्। ध्येयमस्ति यद् हानिया हमासातंकि-गुल्मस्य पक्षत: भूरि-शान्तिवार्तासु सक्रिय: अवर्तत।

झारखण्ड/दुर्घटना

झारखण्डराज्ये दक्षिणमध्य-रेलवे इत्यस्य टाटानगर-चक्रधरपुररेलप्रभागे यातायातव्यवस्थाया: पुना रचनाय युद्धस्तरेण कार्याणि सम्पाद्यन्ते। हावड़ा-मुम्बई-मेल इत्यस्य अष्टादशशायिकासु षोडशशायिका: रेलमार्गात् अपसारिता: सन्ति। सर्वासां शायिकानाम् अपसारणानन्तरमेव मार्गस्य समीचीनीकरणं वैद्युतीकरणस्य कार्याणि च

सम्पत्स्यन्ते। ध्यातव्यमस्ति यत् ह्यः प्रातः हावड़ा-मुम्बई-रेलयानस्य अष्टादशशायिकाः रेलमार्गपट्टिकातः अवतीर्णाः, येन रेलयात्रा च बाधिताऽस्ति। दक्षिणपश्चिम-रेलप्रभागस्य महाप्रबन्धकः अनिलकुमारमिश्रः उक्तवान् यत् अस्मिन् प्रभागे रेलयानयातायात-सेवायाः पुनरारम्भस्य प्रयासो विधीयते।

## वियतनाम-प्रधानमन्त्रिणः यात्रा

वियतनाम-देशस्य प्रधानमन्त्री मिन्ह् चिन्ह् वर्यः निज-त्रिदिवसीय-भारत-यात्रां सन्दृभ्य अद्य नवीनां दिल्लीं सम्प्राप्तोऽस्ति। अनेन सह अस्यां यात्रायां नैके मन्त्रिणः, उपमन्त्रिणः, औद्योगिकाः प्रतिनिधिमण्डलश्चापि सहभूताः सन्ति। वियतनाम-देशस्य प्रधानमन्त्री श्रीनरेन्द्रमोदिना समं द्वैपाक्षिक-मन्त्रणोपवेशनं करिष्यति। एतस्य सत्कारे प्रधानमन्त्री श्रीनरेन्द्रमोदी रात्रि-भोजनस्य आयोजनमपि करिष्यति। श्रीमिन्हचिन्हः राष्ट्रपतिना श्रीमत्या द्रौपदीमुर्मुवर्यया, उपराष्ट्रपतिना श्रीजगदीप-धनखड़-वर्येण विदेशमन्त्रिणा डॉक्टर एस.जयशंकर-वर्येण च साकमपि सम्भाषणम् आचरिष्यति।

## पेरिस ओलम्पिक क्रीडामहाकुम्भः

फ्रांस-देशस्य पेरिसनगरे प्रवर्तमाने ओलम्पिक-क्रीडामहाकुम्भे अद्य पञ्चमे दिवसे भारतीयाः क्रीडकाः मुष्टा-मुष्टिका-क्रीडायां लक्ष्य-वेधने, बैडमिण्टन-स्पर्धायां, लक्ष्यसंधाने च स्पर्धिष्यन्ते। वारद्वयं यावत् ओलम्पिक-पदकस्य विजेत्री 'लवलीना बोर्गोहाइन' स्वीय-द्वितीय-समूहस्य द्वन्द्वे एस्टोनिया-मध्ये 'क्रिस्टीन कुश' इत्येनां सम्मुखीकरिष्यति। टेबल-टेनिस स्पर्धायां 'श्रीजा अंकुला' प्रागुपान्त्य-चक्रीयं द्वन्द्वं प्रविश्य ऐतिह्यं रचितवती। एषा द्वितीया भारतीया क्रीडिका वर्तते या एवं कर्तुम् अपारयत्। अनया विश्वमानांकने द्वि-पञ्चाशे स्थाने समारूढा सिंगापुर-देशीया 'जैन जिंग' इत्येषा अंक-द्वयं विरुध्य चतुर्भिरंकैः पराभूता।

।। इति वार्ताः।।